## वृद्धाच्छः । (११४/१३३७)

गोत्रे इति नानुवर्तते । सामान्येन विधानम् । वृद्धात् प्रातिपदिकात् छः प्रत्ययो भवति शैषिकः । [1]अणोऽपवादः । गार्गीयः । वात्सीयः । शालीयः । मालीयः । अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधीन् (४.२.१०४, १०६.१०९, ११०) तु परत्वाद् बाधते ॥

## भवतष्ठक्छसौ । (११५/१३३९)

वृद्धात् इत्येव । भवच्छब्दाद् वृद्धात् [2]ठक्छसौ प्रत्ययौ भवतः शैषिकौ[3] । छस्यापवादौ । सकारः पदसञ्ज्ञार्थः । [4]भवतस्त्यदादित्वाद् वृद्धसञ्ज्ञा । [5]भावत्कः । भवदीयः । अवृद्धात्तु भवतः शतुरणेव भवति । भावतः ॥

## काश्यादिभ्यष्ठञ्ञिठौ । (११६/१३४०)

[6]काशि इत्येवमादिभ्यः ठञ् ञिठ इत्येतौ प्रत्ययौ भवतः शैषिकौ । इकार [7]उच्चारणार्थः[8] । ञकार एवोभयत्र विपर्यस्तदेशोऽनुबन्धः । स्त्रीप्रत्यये विशेषः । काशिकी । काशिका । [9]बैदिकी । बैदिका । वृद्धात् इत्यत्रा[10]नुवर्तते । ये तु अवृद्धाः पठ्यन्ते, वचनप्रामाण्यात् तेभ्यः प्रत्ययविधिः । देवदत्तशब्दः पठ्यते, तस्य 'एङ् प्राचां देशे' (१.१.७५/१३३८) इति वृद्धसञ्ज्ञा । [11]दैवदत्तिकः । वाहीकग्रामस्य तु नास्ति वृद्धसञ्ज्ञा । [12]दैवदत्तः । कथं भाष्ये उदाहृतं 'वा नामधेयस्य वृद्धसञ्ज्ञा वेदितव्या देवदत्तीयाः, दैवदत्ताः' इति, यावता वृद्धसञ्ज्ञापक्षे काश्यादित्वात् ठञ्ञिठाभ्यां भवितव्यम् ? तत्रैवं वर्णयन्ति, वा नामधेयस्य इति व्यवस्थितविभाषेयम्, सा छे कर्तव्ये भवति, ठञ्ञिठयोर्न भवति इति ।

काशि । [13]चेदि । सञ्ज्ञा । [14]संवाह । अच्युत । [15]मोहमान । शकुलाद । [16]हस्तिकर्षू । [17]कुदामन् । [18]हिरण्य । करण[19] । [20]गोधाशन । [21]भौरिकि । भौलिङ्गि । अरिन्दम । [22]सर्वमित्र । देवदत्त । साधुमित्र । दासमित्र । दासग्राम । सौधावतान । युवराज । उपराज । सिन्धुमित्र । देवराज । 'आपदादिपूर्वपदात् कालात्' (ग.सू. ९६) । आपत्कालिकी, आपत्कालिका । [23]और्ध्वकालिकी, और्ध्वकालिका । तात्कालिकी, तात्कालिका ॥

## वाहीकग्रामेभ्यश्च । (११७/१३४१)

[24]वृद्धात् इत्येव । वाहीकग्रामवाचिभ्यः वृद्धेभ्यः [25]ठञ्ञिठौ प्रत्ययौ भवतः शैषिकौ । छस्यापवादौ । [26]शाकलिकी, शाकलिका । [27]मान्थविकी, मान्थविका ॥

---

1. अणोऽपवादः नास्ति क.ड.इ.फ. 2. ठक् छस् इत्येतौ ब.इ.फ.ह. 3. सकार उच्चारणार्थः । जकारः एव उभयत्र आदेशः इत्यधिकम् ब. 4. भवतः नास्ति फ. 5. भवतः अयं भावत्कः क. 6. काश्यादिभ्यः फ. 7. सुखमुच्चारणार्थः फ. 8. छस्यापवादः इत्यधिकम् ह. 9. चैदिकी चैदिका ब. 10. अत्र नास्ति फ. 11. देवदत्तिकः क. 12. देवदत्तः ब.क.ह. 13. बेदि इ, बदि ब. 14. संवाहि ह.क. 15. मोदमान ड.ब. क, मादमान ह. 16. बस्तिकरिषु ह, हस्तिकर्ष क. 17. कुमार ब. क, कुनामन् इ. 18. नास्ति ह. 19. कुमातनु इत्यधिकम् ब. 20. गोवाशन ब.क. 21. भौरिगि भौलिगि ब. 22. सवामि ब. 23. पौर्वकालिकी पौर्वकालिका इत्यधिकम् ब. 24. वाक्यमिदं नास्ति फ. 25. शब्देभ्यः इत्यधिकम् फ. 26. शालिकी शालिका ह. 27. माण्डविकी माण्डविका फ.ह, माञ्चविकी माञ्चविका ड, मार्थविकी मार्थविका ब.